श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ पञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चाशः सर्गः ॥

## क्षुत्तृडभिभूतानां वानराणामेकस्यां गुहायां प्रवेशस्तत्र तैर्दिव्यवृक्षसरोवरभवनानामेकस्या वृद्धायास्तपस्विन्याश्चावलोकनं हनुमता तां प्रति तस्याः परिचयस्य जिज्ञासनम्

सह ताराङ्गदाभ्यां तु सङ्गम्य हनुमान् कपिः।
विचिनोति च विन्ध्यस्य गुहाश्च गहनानि च ॥ **4.50.1** ॥

सिंहशार्दूलजुष्टाश्च गुहाश्च परितस्तदा।
विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च ॥ **4.50.2** ॥

आसेदुस्तस्य शैलस्य कोटिं दक्षिणपश्चिमाम्।
तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ॥ **4.50.3** ॥

स हि देशो दुरन्वेष्यो गुहागहनवान् महान्।
तत्र वायुसुतः सर्वं विचिनोति स्म पर्वतम् ॥ **4.50.4** ॥

परस्परेण रहिता अन्योन्यस्याविदूरतः।
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ **4.50.5** ॥

मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवानपि।
अङ्गदो युवराजश्च तारश्च वनगोचरः ॥ **4.50.6** ॥

गिरिजालावृतान् देशान् मार्गित्वा दक्षिणां दिशम्।
विचिन्वन्तस्ततस्तत्र ददृशुर्विवृतं बिलम् ॥ **4.50.7** ॥

दुर्गमृक्षबिलं नाम दानवेनाभिरक्षितम्।
क्षुत्पिपासापरीतास्तु श्रान्तास्तु सलिलार्थिनः॥ **4.50.8** ॥

अवकीर्णं लतावृक्षैर्ददृशुस्ते महाबिलम्।
तत्र क्रौञ्चाश्च हंसाश्च सारसाश्चापि निष्क्रमन्॥ **4.50.9** ॥

जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः।
ततस्तद् बिलमासाद्य सुगन्धि दुरतिक्रमम्॥ **4.50.10** ॥

विस्मयव्यग्रमनसो बभूवुर्वानरर्षभाः।
सञ्जातपरिशङ्कास्ते तद् बिलं प्लवगोत्तमाः॥ **4.50.11** ॥

अभ्यपद्यन्त संहृष्टास्तेजोवन्तो महाबलाः।
नानासत्त्वसमाकीर्णं दैत्येन्द्रनिलयोपमम्॥ **4.50.12** ॥

दुर्दर्शमिव घोरं च दुर्विगाह्यं च सर्वशः।
ततः पर्वतकूटाभो हनूमान् मारुतात्मजः॥ **4.50.13** ॥

अब्रवीद् वानरान् घोरान् कान्तारवनकोविदः।
गिरिजालावृतान् देशान् मार्गित्वा दक्षिणां दिशम्॥ **4.50.14** ॥

वयं सर्वे परिश्रान्ता न च पश्याम मैथिलीम्।
अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः॥ **4.50.15** ॥

जलार्द्राश्चक्रवाकाश्च निष्पतन्ति स्म सर्वशः।
नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः॥ **4.50.16** ॥

तथा चेमे बिलद्वारे स्निग्धास्तिष्ठन्ति पादपाः।
इत्युक्तास्तद् बिलं सर्वे विविशुस्तिमिरावृतम्॥ **4.50.17** ॥

अचन्द्रसूर्यं हरयो ददृशू रोमहर्षणम्।
निशाम्य तस्मात् सिंहांश्च तांस्तांश्च मृगपक्षिणः॥ **4.50.18** ॥

प्रविष्टा हरिशार्दूला बिलं तिमिरसंवृतम्।
न तेषां सज्जते दृष्टिर्न तेजो न पराक्रमः॥ **4.50.19** ॥

वायोरिव गतिस्तेषां दृष्टिस्तमसि वर्तते।
ते प्रविष्टास्तु वेगेन तद् बिलं कपिकुञ्जराः॥ **4.50.20** ॥

प्रकाशं चाभिरामं च ददृशुर्देशमुत्तमम्।
ततस्तस्मिन् बिले भीमे नानापादपसङ्कुले॥ **4.50.21** ॥

अन्योन्यं सम्परिष्वज्य जग्मुर्योजनमन्तरम्।
ते नष्टसंज्ञास्तृषिताः सम्भ्रान्ताः सलिलार्थिनः॥ **4.50.22** ॥

परिपेतुर्बिले तस्मिन् कञ्चित् कालमतन्द्रिताः।
ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः॥ **4.50.23** ॥

आलोकं ददृशुर्वीरा निराशा जीविते यदा।
ततस्तं देशमागम्य सौम्या वितिमिरं वनम्॥ **4.50.24** ॥

ददृशुः काञ्चनान् वृक्षान् दीप्तवैश्वानरप्रभान्।
सालांस्तालांस्तमालांश्च पुन्नागान् वञ्जुलान् धवान्॥ **4.50.25** ॥

चम्पकान् नागवृक्षांश्च कर्णिकारांश्चपुष्पितान्।
स्तबकैः काञ्चनैश्चित्रै रक्तैः किसलयैस्तथा॥ **4.50.26** ॥

आपीडैश्च लताभिश्च हेमाभरणभूषितान्।
तरुणादित्यसङ्काशान् वैदूर्यमयवेदिकान्॥ **4.50.27** ॥

बिभ्राजमानान् वपुषा पादपांश्च हिरण्मयान्।
नीलवैदूर्यवर्णाश्च पद्मिनीः पतगैर्वृताः॥ **4.50.28** ॥

महद्भिः काञ्चनैर्वृक्षैर्वृता बालार्कसन्निभैः।
जातरूपमयैर्मत्स्यैर्महद्भिश्चाथ पङ्कजैः॥ **4.50.29** ॥

नलिनीस्तत्र ददृशुः प्रसन्नसलिलायुताः।
काञ्चनानि विमानानि राजतानि तथैव च ॥ **4.50.30** ॥

तपनीयगवाक्षाणि मुक्ताजालावृतानि च।
हैमराजतभौमानि वैदूर्यमणिमन्ति च ॥ **4.50.31** ॥

ददृशुस्तत्र हरयो गृहमुख्यानि सर्वशः।
पुष्पितान् फलिनो वृक्षान् प्रवालमणिसन्निभान् ॥ **4.50.32** ॥

काञ्चनभ्रमरांश्चैव मधूनि च समन्ततः।
मणिकाञ्चनचित्राणि शयनान्यासनानि च ॥ **4.50.33** ॥

विविधानि विशालानि ददृशुस्ते समन्ततः।
हैमराजतकांस्यानां भाजनानां च राशयः ॥ **4.50.34** ॥

अगुरूणां च दिव्यानां चन्दनानां च सञ्चयान्।
शुचीन्यभ्यवहाराणि मूलानि च फलानि च ॥ **4.50.35** ॥

महार्हाणि च यानानि मधूनि रसवन्ति च।
दिव्यानामम्बराणां च महार्हाणां च सञ्चयान् ॥ **4.50.36** ॥

कम्बलानां च चित्राणामजिनानां च सञ्चयान्।
तत्र तत्र च विन्यस्तान् दीप्तान् वैश्वानरप्रभान् ॥ **4.50.37** ॥

ददृशुर्वानराः शुभ्राञ्जातरूपस्य सञ्चयान्।
तत्र तत्र विचिन्वन्तो बिले तत्र महाप्रभाः ॥ **4.50.38** ॥

ददृशुर्वानराः शूराः स्त्रियं काञ्चिददूरतः।
तां च ते ददृशुस्तत्र चीरकृष्णाजिनाम्बराम् ॥ **4.50.39** ॥

तापसीं नियताहारां ज्वलन्तीमिव तेजसा।
विस्मिता हरयस्तत्र व्यवतिष्ठन्त सर्वशः।
पप्रच्छ हनुमांस्तत्र कासि त्वं कस्य वा बिलम्॥ **4.50.40** ॥

ततो हनूमान् गिरिसन्निकाशः
  कृताञ्जलिस्तामभिवाद्य वृद्धाम्।
पप्रच्छ का त्वं भवनं बिलं च
  रत्नानि चेमानि वदस्व कस्य॥ **4.50.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चाशः सर्गः॥